ISSN 2250-3064

# HAIM-PRAPA

Vol. 7, February 2016

A Research Journal of
Department of Sanskrit and Bharatiyavidya
Hemchandracharya North Gujarat University
Patan (Gujarat)




Scanned with CamScanner

# ॥ भारतीयप्रतिभातत्त्वचिन्तपरिप्रेक्ष्ये वामनो राजशेखरो हेमचन्द्रश्च ॥

डॉ. ललित पटेल *

चतुर्वर्गफलप्राप्तिः काव्यादेव विश्वनाथोक्तदिशा ।[१] कवेः वाणीं तद्गतञ्च माधुर्यमनुभूय पीत्वा च यादृशं सुखं भावकाः जनाश्चानुभवन्ति न तादृशमन्ये । मानवीयजीवनोद्देशस्य जीवनोपायानां च प्रदर्शनं तेषामिष्टं भवति । न च वैदुष्यस्य सम्प्रतिष्ठापनं तेषां प्रियम् ।[२] वस्तुतः काव्यस्य पक्षद्वयं भवति अभिव्यक्तिपक्षः अनुभूतिपक्षश्च । उभयोरप्येतयोः प्रभावेण काव्यपाठकयोर्मध्ये एकत्वस्य प्रतिष्ठापना सञ्जायते । इदमेकत्वमेव रसात्मकता भवति ।[३]रसात्मकतायाः आविर्भावो विलक्षणकविकर्मणा जायते । एवंविधस्य काव्यस्य लोकोत्तरत्वादेवाचार्य आनन्दवर्धनस्तस्य प्रशंसामेवमाह ---

**प्रतीयमानं पुनरन्यदेव वस्त्वस्ति वाणीषु महाकवीनाम् ।**

**यत् तत् प्रसिद्धावयवातिरिक्तं विभाति लावण्यमिवाङ्गनासु ॥[४]**

एतादृशस्य लोकोत्तरवर्णननिपुणकविकर्मकाव्यत्वस्य समुल्लासे (निर्माणे) कः हेतुः ? इत्यस्य चिन्तनं द्विधा प्रवर्तते साहित्यपरम्परयाम् ।(१) प्रतिभा – व्युत्पत्ति – अभ्यासश्चत्येतत्वस्त्रितयं हेतुः काव्यसमुल्लासे ।(२) प्रतिभा प्रतिभानं शक्तिर्वा हेतुः काव्यनिर्माणे । तत्र प्रथमं चिन्तनं – बहुशः काव्यशास्त्रीयग्रन्थकर्तारः मन्यन्ते । यथा

**नैसर्गिकी च प्रतिभा श्रुतं च बहुनिर्मलम् ।**

**अमन्दश्चाभियोगोस्याः कारणं काव्यसंपदः ॥[५] - दण्डी**

HAIM-PARAPA : A Researh Journal of the Department of Sanskrit & Bharatiyavidya Bhavan, Hemchandracharya North Gujarat Unviersity, Patan. Vol.VII. 2017. P.79-90

* असि.प्रोफेसर, श्री सोमनाथ संस्कृत युनिवर्सिटी,सञ्चालित-संस्कृतकोलेज,वेरावलम्

Scanned with CamScanner

काव्यं तु जायते जातु कस्यचित् प्रातिभावतः ।

शब्दाभिधेये विज्ञाय कृत्वा तद्विदुपासनम् ।

विलोक्यान्यनिबंधांश्च कार्य काव्यक्रियादरः ॥[६] – भामहः

त्रितयमिदं व्याप्रियते शक्तिर्व्युत्पत्तिरभ्यासः।[७] -रुद्रटः

शक्तिर्निपुणता लोकशास्त्रकाव्याद्यवेक्षणात् ।

काव्यज्ञशिक्षयाभ्यास इति हेतुस्तदुद्भवे ॥[८] – मम्मटः

एकावली (१.१२), वाग्भटालङ्कार (१.३) – इत्यादिष्वपि शक्तिर्व्युत्पत्तिरभ्यासा इति त्रितं काव्यहेतुत्वेन स्वीकृतम् ।[९] ततोऽपि तेषां मम्मटाप्रभृतीनां मतं वर्तते यद्–शक्तिनिपुणताऽभ्यासा इते त्रयोऽपि मिलिताः दण्डचक्रादिन्यायेन काव्यनिर्माणं प्रति हेतुः, न तु व्यस्ता, तृणारणिमणिन्यायेन प्रत्येकं हेतवः ।[१०]

तृणविशेषात् अरणिमथनात् सूर्यकान्तमणेश्च अग्नेः उत्पत्तिः पूर्वकाले भवति स्म । अग्निजनने त्रयाणां साम्यं भवेत् तथापि अग्निजननक्रियायां वैषम्यमेवास्ति । यथा फूत्कारतः तृणविशेषात्, घर्षणतः अरणेः एवं सूर्यकिरणसम्पर्केण मणितः अग्निः उत्पाद्यते स्म । त्रीण्यपि स्वतन्त्रकारणानि । शक्तिर्निपुणताभ्यासाः समुदिता दण्डचक्रादिन्यायेन परस्पर सापेक्षाः व्यस्ताः तृणारणिमणिन्यायेन प्रत्येकं कार्यजनकाः । (काव्यप्रकाशस्य झलकीकरटीकातः)तत्र द्वितीयं चिन्तनम् वर्तते यत् कतिपयानामन्यग्रन्थकर्तृणां मतानुसारं प्रतिभा शक्तिर्वा मात्रैकः काव्यहेतुः काव्यकर्मणि । यथा –

सा शक्तिः केवलम् काव्ये हेतुरिति यायावरीयः ।[११]

प्रतिभैव च कवीनां काव्यकरणकारणम् ॥ - वाग्भटः

व्युत्पत्त्यभ्यासौ तस्या एव संस्कारकारकौ न तु काव्यहेतू ॥[१२]

तस्य कारणं कविगता केवला प्रतिभा । [१३]- जगन्नाथः

**का प्रतिभा ?**

प्रतिभा एका शक्तिः । यया शक्त्या काव्यविषये कविं रमणीयताया बोधो भवति । पुनश्च सः ावकेभ्यः अनुभूतसौन्दर्यस्य प्रत्यक्षं चित्रं प्रस्तौति । यया शक्त्या सः भावकहृदये सुप्तानामनुभूतीनां पुनः ागरणं करोति । सहैव नैजानुभूतानि रमणीयाणि वस्तून्यपि भाषायाः माध्यमेन वर्णनं कृत्वा ामान्यजनेभ्यः ग्राह्यं करोति ।[१४] प्रतिभायाः अर्थः निम्नपरिभाषया स्पष्टो भवति –

- प्रज्ञा नवनवोन्मेषशालिनी प्रतिभा मता......
  ...... वर्णना निपुणः कविः । [१५] – भट्टतौतः
- प्रतिभा अपूर्ववस्तुनिर्माणक्षमा प्रज्ञा तस्या विशेषो रसावेशवैशद्यसौन्दर्यकाव्यनिर्माणक्षमत्वम् एवं शक्तिः प्रतिभानं वर्णनीयवस्तुविषय - नूतनोल्लेखशालित्वम् । [१६] लोचनम्
- अपारे काव्यसंसारे कविरेक: प्रजापतिः ।
  यथास्मै रोचते विश्वं तथेदं परिवर्तते ॥[१७] - आनन्दवर्धनः
- प्रसन्ना पदमव्यार्थयुक्त्युद्बोधविधायिनी ।
  स्फुरन्ती सत्कवेर्बुद्धि प्रतिभासर्वतोमुखी ॥[१८] – वाग्भटः
- कवित्वबीजं प्रतीभानम् । [१९] - वामनः/रुद्रटः

**वामनदिशा प्रतिभा**

वामनाचार्यस्य मतानुसारं काव्यनिर्माणे काव्यसमुल्लासे काव्याङ्गानि साधनानि । तश्च त्रीणि लोको विद्या प्रकीर्णश्च ।[२०] तत्रापि लोकवृत्तं लोकः।[२१](वा.सूत्रवृत्तिः-१/३-२)।[२२] शब्दस्मृत्यभिधानकोश-छन्दोविचितिकला – कामशास्त्र – दण्डनीतिपूर्वा विद्याः १-३-३।[२३]

लक्ष्यज्ञत्वमभियोगो वृद्धसेवावेक्षणं प्रतिभानमवधानञ्च प्रकीर्णम् (१-३-११)।[२४] प्रथमाधिकरणस्य तृतीयेऽध्याये विंशतिसूत्रेषु काव्याङ्गानां निरूपणं वर्तते । तत्र तृतीयं काव्याङ्ग प्रकीर्णम् । तत्रापि षड्प्रकीर्णानि, तेषु पञ्चमं प्रतिभानम् । तत्रोक्तम् – कवित्वबीजं प्रतिभानम् १-३-१६।[२५] कवित्वस्य बीजं कवित्वबीजम् । जन्मान्तरागतसंस्कारविशेष: कश्चित् । यस्माद्विना काव्यं न निष्पद्यते । निष्पन्नं वा



Scanned with CamScanner

हास्याऽऽयतनं स्यात् ।[२६] बीजमभिनवपदार्थस्फुरणहेतुः । संस्कारो वासनात्मा। यदाह भट्टगोपालः – कवित्वस्य लोकोत्तरवर्णनानैपुण्यलक्षणस्य बीजमुपादानस्थानीयः संस्कारविशेषः । कार्यकल्पनीया काचिद्वासनाशक्तिः इति ।[२७] हास्यायतनं परिहासास्पदमिति । उक्तं च भामहेनापि –

नाऽकवित्वमधर्माय मृतये दण्डनाय वा ।

कुकवित्वं पुनः साक्षान्मृतिमाहुर्मनीषिणः ॥[२८]

राजशेखरदृष्ट्या प्रतिभा


प्रतिभा शब्दस्य अथवा शक्तिशब्दस्य व्याख्यार्थं प्रज्ञाशब्दस्य प्रयोगो भवति। राजशेखरेण स्मृतिमतिप्रज्ञानां पारस्परिकान्तरमनेन प्रकारेण दर्शितमस्ति –" त्रिधा च सा (बुद्धिः) स्मृतिः मतिः प्रज्ञेति| अतिक्रान्तस्यार्थस्य स्मर्त्री स्मृतिः|वर्तमानस्य मन्त्री मतिः| अनागतस्य प्रज्ञात्री प्रज्ञा । सा त्रिप्रकाराऽपि कवीनामुपकर्त्री " ।[२९] काव्यप्रकाशस्य सम्प्रदायप्रकाशिनीटीकायां श्लोकोऽयं समागतः –

स्मृतिर्व्यतीतविषया मतिरागामिगोचराः ।

बुद्धिस्तत्कालिकी ज्ञेया प्रज्ञात्रैकालिकी मता ॥[३०]

राजशेखरदिशा कविकर्मणि समाधिः परं व्याप्रियते । मनसः एकाग्रता समाधिः| समाहितं चित्तमर्थान् पश्यति इति ।[३१] पुनश्चाभ्यसोऽप्यावश्यकः कविकर्मणि । उकतं च् तत्र –" अविच्छेदेन शीलनमभ्यासः । स हि सर्वगामी सर्वत्र निरतिशयं कौशलमाधत्ते [३२] इति । समाधिः आन्तरिकः प्रयत्नः, अभ्यासस्तु बाह्यः प्रयत्नः । समाध्यभ्यासौ शक्तिं (कवित्वबीजभूतां काञ्चिद् वासनां) उद्भासयतः । अतः काव्यकर्मणि सैव शक्तिरेव हेतुः [३३] सा शक्तिः प्रतिभाव्युत्पत्तिभ्यां भिन्ना भवति । प्रतिभाव्युत्पत्तिक्रिये शक्तिजन्ये स्तः। शक्तिमान् लोकशास्त्रकाव्येषु निपुणो भवति एवं शक्तिसम्पनस्यैव पुंसः प्रतिभया पदार्थावभासो भवति। अर्थात शक्त एव प्रतिभावान्,शक्त एव व्युत्पत्तिमान् । उक्तं च – " शक्तस्य प्रतिभाति शक्तश्च व्युत्पद्यते ।[३४]

राजशेखरदिशा प्रतिभा




" या शब्दग्राममर्थसार्थमलङ्कारतन्त्रमुक्तिमार्गमन्यदपि तथाविधमधिहृदयं प्रतिभासयति सा प्रतिभा "[१५] इति राजशेखरः। प्रतिभाहीनस्य पदार्थसमूहः प्रत्यक्षोऽपि परोक्ष इव, प्रतिभावतः पदार्थसमूहः परोक्षोऽपि प्रत्यक्ष इव भवति । यथा-मेधाविरुद्रकुमारदासादयो जन्मान्धा अपि लोकोत्तरवर्णननिपुणाः श्रूयन्ते।[१६]


**प्रतिभाभेदः**

सा प्रतिभा द्विधा कारयित्री भावयित्री च । कारयित्री-उक्तं च –"कवेरुपकुर्वाणा कारयित्री । साऽपि त्रिविधा सहजाऽऽहार्यौपदेशिकी च । जन्मान्तरसंस्कारापेक्षिणी सहजा । इह जन्मसंस्कारयोनिः आहार्या । मन्त्रतन्त्राद्युपदेशप्रभवा औपदेशिकी ।[१७] या जन्मान्तरसंस्कारापेक्षिणी अपि एतज्जन्मनोऽल्पेनापि संस्कारेण उद्बुद्धा, तां सहजां निर्दिशन्ति विद्वांसः,या पुनः महता संस्कारेणोत्पद्यते साऽऽहार्या इति व्यपदिश्यते । या च ऐहिकेनैव उपदेशेन संस्कारेण च सम्पद्यते सा औपदेशिकी कथ्यते । तदनुगुणं कवयोऽपि त्रयः सारस्वतः आभ्यासिकः औपदेशिकश्चेति भेदात् । तत्र जन्मान्तरसंस्कारेण प्रवृत्ता सरस्वती (समुज्वलबुद्धिः) यस्यामसौ प्रथमो बुद्धिमान् सारस्वतः । इह जन्मनोऽभ्यासेन उद्भासिता भारती यस्यामसौ द्वितीयः आहार्यबुद्धिः आभ्यासिकः । उपदेशितैः मन्त्रतन्त्रादिभिः दर्शितः वाचां विभवो येन सः तृतीयो दुर्बुद्धिः औपदेशिकः ।[१८]



Scanned with CamScanner

राजशेखरदिशा प्रतिभाप्रकारः -




भावयित्री

भावकस्योपकुर्वाणा भावयित्री। सा भावयित्री प्रतिभा हि कवेः श्रमं ( शब्दार्थसंयोजनात्मकं प्रयत्नम् अभिप्रायं (मनोगतं भावम् ) च भावयति । भावयित्र्या प्रतिभया कवेः व्यापारतरुः फलितो भवति । तस्याः अभावे कवेः व्यापारतरुः अवकेशी (निष्फलः) भवेत् । तदनुसारं भावकान् विभजते राजशेखरः। भावकाः चतुर्विधाः अरोचकिनः,सतृणाभ्यवहारिणः,मत्सरिणः,तत्वाभिनिवेशिनश्च।[३९]

(१)अरोचकिनः न रोचयति प्रीणियति इति अरोचको नाम रोगविशेषः,स अस्ति येषां ते अरोचकिनः,अर्थात् अरोचकव्याधिशालिनः । यथा अरोचके रोगे जाते स्वादिष्टेऽप्यन्ने रुर्चिन भवति जनानां तथैव अरोचकिनो भावकाः कवयोऽपि सरसेऽपि काव्ये तुच्छत्वप्रत्ययात् नासाक्षिसङ्कोचादिकं कुर्वन्ति।


अरोचकिताऽपि द्विविधा नैसर्गिकी ज्ञानयोनिर्वा। नैसर्गिक्याः अरोचकतायाः सहस्रसंस्कारैरपि त्यागो न भवति यथा वंगस्य कृते संस्कारोऽपि मालिन्यं न निर्गच्छति तथैव नैसर्गिकारोचकतायुक्तानां काव्ये समादृतेऽपि चेतसः प्रत्ययो न भवति । ज्ञानयोनौ रोचकतायां तु विशिष्टज्ञेयवति वचसि रोचकतावृत्तिरेव इति यायावरीयः।[४०]

(२) सतृणाभ्यवहारिणः- यथा बुभुक्षितः स्थाल्यां परिवेषितं भोजनं प्रसन्नतया भुङ्क्ते तथैव सतृणम् अपरित्यज्य अभ्यवहन्ति=खादन्ति इति सतृणाभ्यवहारिणः, तेषां भोजने तात्पर्यं, न तु मधुरामधुरविवेके। सतृणाभ्यवहारिणः अविवेचकाः भावकाः कवयः। इयं प्रतिभा सर्वजनसमानाधिकरणा भवति यतो हि सर्वस्य व्युत्पिसोः सा प्रथमाश्रयजीवा भवति।[४१]

(३) मत्सरिणः- मत्सरिणां तु प्रतिभातमपि न प्रतिभातं भवति, यतो हि परगुणकथने ते वाचं संयच्छन्ते। निर्मत्सरः प्रतिभासम्पन्नमनुष्यो दुर्लभो भवति।[४२]

(४) तत्त्वाभिनीवेशिनः - तत्त्वे वस्तुयाथार्थे अभिनिवेशः = आग्रहः पस्य सः तत्त्वाभिनिवेशी। एतादृशः समालोचक :सहस्त्राणां जनानां मध्ये कश्चिदेक एव भवति |[४३]

## राजशेखरदिशा प्रतिभाप्रकारः -




रुद्रटेणापि प्रतिभायाः भेदद्वयं कृतम् – सहजा उत्पाद्यते इति।[४४] हेमचन्द्रोऽपि उत्पाद्यता तथा औपाधिकी भेदद्वयं मन्यते।[४५] दण्डीप्रभृतिप्राचीनग्रन्थकाराणां मते कविगता प्रतिभा नैसर्गिकी भवति –" नैसर्गिकी च प्रतिभा ।" रुद्रटहेमचन्द्रादीनां मते व्युत्पत्त्या अभ्यासेन च प्रतिभा समुज्जवला भवति । व्युत्पत्त्याभावे समुत्पन्नदोषान् कविः स्वप्रतिभया गोपितुं शक्नोति। प्रतिभायाः अभावे व्युत्पत्तिजन्यदोषान् गूहितुं शक्तो न भवति। किन्तु राजशेखरानुसारं " प्रतिभाव्युत्पत्तीमिथः समवेते श्रेयस्यौ" इति [४६]



Scanned with CamScanner

हेमचन्द्राचार्यदिशा प्रतिभा

प्रतिभास्य हेतुः।[47] अस्य काव्यस्य प्रधानं कारणं प्रतिभा नवनवोल्लेखशालिनी प्रज्ञा।[48] काव्यानि... इयं प्रतिभा एव प्रधानकारणम्। व्युत्पत्त्यभ्यासौ तु प्रतिभाया एव संस्कारकौ इति कथ्यते। सा च सहजौपाधिकी चेति द्विधा।[50]

(१) सहजा

सावरणक्षयोपशममात्रात्सहजा।[51] अस्मिन् लक्षणे जैनदर्शनस्य आवरणं क्षम् उपशमः चेति संज्ञात्रयम्। आवरणानां क्षयात् उपशमात् च ज्ञानस्वरूपा आत्मरूपा सहजा प्रतिभा प्रादुर्भवति। कथयेत् ? उक्तं च " सवितुरिव प्रकाशस्वभावस्यात्मनोऽभ्रपटलमिव ज्ञानवरणीयद्याचरणं तस्योदितस्य क्षयेऽनुदितस्योपशमे च यः प्रकाशाविर्भावः सा सहजा प्रतिभा। मात्रग्रहणं मन्त्रादिकारणनिषेधार्थम्।[52] आत्मनः ज्ञानरूपः प्रकाश एव सहजा। पुनश्च तत्रोक्तम् " सहजप्रतिभाबलाद् हि गुणभृतः सद्यो द्वादशाङ्गीमासूत्रयन्ति स्म।[53]

(२) औपधिकी

मन्त्रादेरौपाधिकी।[54] अर्थात् मन्त्रदेवतानुग्रहादिप्रभवौपाधिकी प्रतिभा। इयमपि आवरणक्षयोपशमनिमित्ता एव।[55] दृष्टोपाधिनिबन्धनत्वात् = मन्त्रादिवाह्यनिमित्तत्वात् औपधिकी इति उच्यते।

## प्रतिभायाः तौलनिकोऽभ्यासः

| आचार्य | वामनः (कालः -४ सदी) | राजशेखर (कालः -९ सदी) | हेमचन्द्रः (कालः – ११ सदी) |
|---|---|---|---|
| ग्रन्थः | काव्यालङ्कारसूत्रवृत्तिः | काव्यमीमांसा | काव्यानुशासनम् |
| काव्यहेतुः | कवित्वबीजं प्रतिभा | कवित्वबीजभूता काचिद्वासना शक्तिः | प्रतिभास्य हेतुः |
| भेदाः | पञ्चमं प्रकीर्णं प्रतिभानम् | कारयित्री - सहजा- आहार्या औपदेशिकी च भावयित्री चतुर्धा | सहजा औपाधिकी च |
| दृष्टिः | कवित्वबीजमिति अलङ्कारवादिदृष्टिः | काव्यशिक्षाविषयिकी दृष्टिः कविभेदात् शिष्यभेदाच्च | जैनदर्शनविषयिकी दृष्टिः |



Scanned with CamScanner

भारतीयप्रतिभातत्त्वचिन्तनपरिपेक्ष्ये वामनो राजशेखरो हेमचन्द्रश्च इत्येतेषां तौलनिकेनाभ्यासेन त्रयाणामपि दृष्टिभेदे भिन्नता दृश्यते। वामनस्य अलङ्कारवादिदृष्टिः, राजशेखरस्य काव्यशिक्षाविषयिकी दृष्टिः, हेमचन्द्रस्य तु जैनदर्शनयुक्ता दृष्टिः। दृष्टिभेदात् लक्षणभेदः ,क्वचिद् संज्ञाभेदः,प्रकारभेदश्च समुत्पन्नः। राजशेखरस्य यावत्प्रभावो हेमचन्द्रे वर्तते, तातत्वामनस्य न, यथा राजशेखरस्य उपदेशप्रभवा औपदेशिकी इति उपाधिप्रभवा औपाधिकी" इति हेमचन्द्रस्य। तत्र मन्त्रादयः उपदेशाः वा उपधयः| एवं त्रयाणामपि प्रतिभाविषयकं चिन्तनं स्वतन्त्रं नूतनं च प्रतिभाति दृष्टिभेदात् |

॥ सन्दर्भः ॥

१. चतुर्वर्गफलप्राप्तिः सुखादल्पधियामपि।
काव्यादेव यतस्तेनतत्स्वरूपं निरूप्यते ॥ विश्वनाथः-साहित्यदर्पणः,१/२

२. आचार्य-जगदीशचन्द्रमिश्रः, संस्कृतकाव्यशास्त्रेतिहासः,१/२

३. तत्रैव.पृ.३३

४. आनन्दवर्धनः –ध्वन्यालोकः, १/६

५. दण्डी- काव्यादर्शः,१/१०३

६. भामहः-काव्यालङ्कारः,१/५ एवं १०

७. रुद्रटः-काव्यालङ्कारः,१/१४

८. मम्मटः-काव्यप्रकाशः,१/८

९. पी.वी.काणे-संस्कृतकाव्यशास्त्र का इतिहास,पृ.-४३१

१०. "हेतुस्तदुद्भवे.....' इति काव्यप्रकाशे,१/८ कारिकांशः

११. राजशेखरः-काव्यमीमांसा,४/पृ.-५१

१२. वाग्भट्टः-अलङ्कारतिके द्वितीयपृष्ठे

१३. जगन्नाथः-रसगङ्गाधरः,पृ,-८

१४. पी.वी.काणे-संस्कृतसाहित्य का इतिहास,पृ,-४३१



Scanned with CamScanner

१५. भट्टतौतः – काव्यकौतुकः पृ,-२१

१६. अभिनवगुप्तः-लोचनम्, पृ,-६४ एवं पृ,-१६४

१७. आनन्दवर्धनः –ध्वन्यालोकः, पृ,-२७८

१८. वाग्भटः – वाग्भटालङ्कारः,१/४

१९. वामनकाव्यालङ्कारसूत्रवृत्तिः,१-३-१६ वृतौ/रुद्रटः १/१५.१६-२०-२७ तत्रैव १-३/१,२,३,एवं११

२०-२७. तत्रैव १ – ३ / १,२,३, एवं ११

२८. भामहः काव्यालङ्कारः-१-१२

२९. राजशेखरः काव्यामीमासा,४/पृ-४९

३०. त्रिवेन्द्रम्-संस्करणस्य काव्यप्रकाशस्य " सम्प्रदायप्रकाशिनी" टीका,पृ,-१३

३१. राजशेखरः-काव्यामीमासा,४/पृ-४९

३२. तत्रैव – ४/पृ.-५०

३३. "सा केवलं काव्य हेतुः" इति यायावरीयः।तत्रैव,पृ-४/५१

३४. तत्रैव- पृ.-५१

३५. तत्रैव- पृ.-५१

३६. तत्रैव- पृ.-५२

३७. तत्रैव- पृ.-५५

३८. तत्रैव- पृ.-५६

३९. तत्रैव- पृ.-६१

४०. तत्रैव- पृ.-६२

४१. तत्रैव- पृ.-६३



Scanned with CamScanner

४२. तत्रैव- पृ.-६४

४३. तत्रैव- पृ.-६४

४४. रुद्रटः-काव्यालङ्कारः,१/१६

४५. हेमचन्द्रः-काव्यानुशासनम्,पृ-४-५

४६. राजशेखरः-काव्यमीमांसा,५/पृ-७२

४७-५५. हेमचन्द्रः-काव्यानुशासनम् – १,४,५,६,७, तथा वृत्तिः

॥ सन्दर्भग्रन्थाः ॥

१. काव्यमीमांसा, कविराजश्रीराजशेखरप्रणीता,डो.कृष्णमणित्रिपाठीद्वारा व्याख्यायिता,चौखम्बासुरभारतिवाराणसी प्रकाशिता ।

२. काव्यामीमांसा,(हिन्दी)

३. संस्कृतकाव्याशास्त्रस्येतिहासः-आचार्य जगदीशचन्द्रमिश्रलिखितः चौखाम्बासुरभारतीप्रकाशनवाराणसीप्रकाशितः ।

४. संस्कृतकाव्यशास्त्रस्येतिहासः-महामहोपाध्यायः-पी.वी.काणे लिखितः, डो.इन्द्रचन्द्रशास्त्रिद्वारा अनुवादितः मोतीलालबनासीदासद्वारा प्रकाशितः।

५. संस्कृतसाहित्येतिहासः,डो.ए.बी.कीथलिखितःडो.मङ्गलदेवशास्त्रिद्वारा अनुवादितः,मोतीलालाबनारसीदासद्वारा प्रकाशितः ।

६ काव्यालङ्कारसूत्रवृत्तिः, आचार्यरामचन्द्रमिश्रद्वारा लिखितचौखम्बाविद्याभवनवाराणसीद्वारा प्रकाशितः ।

७. संस्कृतसाहित्येतिहासः, डो. अजितठाकोरसम्पादिता, पार्श्वपब्लिकेशनअहमदावादप्रकाशिता।

८. ध्वन्यालोकः, डो. रामसागरत्रिपाठीसम्पादितः, मोतीलालाबनारसीदासप्रकशितः।

९. संस्कृतहिन्दीकोषः वामनशिवराम-आप्टेद्वारा रचितः, न्यूभारतीयुवककोर्पोरेशनदेहलीप्रकाशितः ।



Scanned with CamScanner

१०. काव्यप्रकाशः, आचार्यविश्वेश्वरसिद्धान्तशिरोमणीद्वारा व्याख्यायितः,डो.नरेन्द्रसम्पादितः, ज्ञानमण्डल-लिमिटेड-वाराणसीप्रकाशितः।

११. काव्यादर्शः, आचार्यश्रीरामचन्द्रमिश्रव्याख्यायितः,चौखम्बाविद्याभवनवाराणसीप्रकाशितः।

१२. काव्यानुशासनम्,डो.रामानन्दशर्मासम्पादितं कृष्णदास अकादमी वाराणसीप्रकाशितम्।

१३. काव्यालङ्कारः(भामहः), डो.रमेशचन्द्रशुक्लसम्पादितः, पार्श्वपब्लिकेशनअहमदावादप्रकाशितः।

१४. लौकिकन्यायकोषः, डो.प्रमोदगणेशलालद्वारा लिखितः (मराठी), डो. पेन्नामधुसुदनानुवादितः, संस्कृतभारतीनवदेहलीप्रकाशितः।



Scanned with CamScanner